ISSN: 2349-6002

# उपनिषत्सु ज्ञानप्राप्ति शिक्षणपद्धतेराधुनिक शैक्षिकदर्शनयोर्तुलनात्मकमध्ययनम् ।

तेजस् राजूभाई भट्ट
*श्री स्वामिनारायण, विश्वविद्यालय, कलोल- गांधीनगरम्*
doi.org/10.64643/IJIRTV12I8-190275-459

**प्रास्ताविकम् ।- उपनिषदः भारतीयज्ञानपरम्परायां शिक्षणस्य महत्त्वपूर्णमभिन्नमङ्गानि सन्ति, यत्र ज्ञानप्राप्तेः स्वरूपं केवलं शाब्दिकग्रहणपर्यन्तं न स्यात्, किन्तु मानवजीवनस्योत्थानाय कल्याणाय च स्यात् । उपनिषदां शिक्षणदृष्टिः तत्त्वतः अनुभवप्रधानम्, जिज्ञासामूलकम्, आत्मबोधपर्यवसानम्, संवादाधारितम्, मूल्यसमन्वितम् च इति बहुस्तरीया प्रतीतिः। अद्यतनशिक्षणव्यवस्थायामपि यानि सिद्धान्तानि-constructivism, inquiry-based learning, experiential pedagogy, reflective learning, humanistic education-इत्यादीनि प्रमुखस्थानं वहन्ति, तेषां बहूनि मूलतत्त्वान्येव प्राचीनोपनिषददर्शने पूर्वमेव प्रतिपादितानि। अतः उपनिषदः केवलं धार्मिक-दर्शनग्रन्थाः इति न मननीयाः, अपि तु आधुनिकशैक्षिकपरिप्रेक्ष्ये अत्यन्तप्रासङ्गिकाः, तत्त्वतः उपयुक्ताः, दृष्टान्ततया प्रेरणादायिनश्च भवन्ति।**

**उपनिषत्सु गुरुशिष्यसंवादः शिक्षणस्य प्राण इव प्रतिष्ठितः। नचिकेतोः यमेन सह संवादः यथावत् दर्शयति यत् शिष्यस्य प्रश्नः एव ज्ञानोदयस्य प्रथमप्रवेशद्वारम्। नचिकेताः धनराज्यादि वैभवान्, दीर्घायुष्यं, बहुविभवान् अपि अस्वीकरन् सद्विद्यां प्रत्येव स्वन्निष्ठां दर्शयति। अस्य चरित्रस्य मनोवैज्ञानिकार्थोऽयं यत् शिक्षणं तदा एव फलति यदा अन्तःप्रेरणा जागरूका भवति। आधुनिकमनोविज्ञानस्य दृष्ट्या intrinsic motivation इत्यस्य महत्वं सर्वत्र स्वीक्रियते; उपनिषदः तु तस्य प्रथमं दार्शनिकदृष्टान्तं ददाति। अत्र शिक्षकः यमः शिष्यस्य योग्यता, धैर्यतां, सत्यनिष्ठां च पूर्वं परिक्ष्य तदनन्तरं महानोपदेशः प्रदत्तः। अत एव उपनिषदः शिक्षणे स्वाध्यायस्य, धैर्यस्य, विवेकस्य, जिज्ञासायाश्च अनिवार्यता प्रकाशयन्ति।**

**उपनिषत्सु दृष्टान्तोपदेशस्य विशिष्टस्थानं दृश्यते। वटबीजस्य सूक्ष्माणुस्थायनं ब्रह्मणः सर्वव्यापकत्वस्य प्रतीकम् इति यथा प्रदर्श्यते, तथा जलनद्यः समुद्रे प्रविशन्ति इति दृष्टान्तेन जीवात्मा-परमात्मैक्यं बोध्यते। एते दृष्टान्ताः केवलं कथानकसौष्ठवं न, अपि तु जटिलतत्त्वानां सरलानुभवयोक्तं व्याख्यानम् इति आधुनिकशैक्षिकदर्शनेऽपि अत्यन्तमार्गदर्शकाः भवन्ति । experiential learning इति सिद्धान्तः अस्मादेव प्रेरणाम् अनुभूयते यत् जटिलतत्त्वं प्रत्यक्षानुभवेनैव ग्रहीतुम् शक्यते।**

**तत एव मौनोपदेशः उपनिषत्सु सूक्ष्मोपायः निर्दिष्टः। यतो वाचो निवर्तन्ते[1] इति वाक्येन उच्चतमज्ञानस्य वाक्यपरिच्छेदेन अधिकत्वं दर्श्यते। मौनमेव आत्मबोधस्य माधुर्यं वहति। आधुनिक 'mindfulness education' अथवा 'reflective pedagogy' इति पद्धतिषु, मौनचिन्तनस्य महत्त्वं वर्धते। उपनिषदः तु अद्यतनकल्पनातः सहस्राब्दिपूर्वमेव विषयोऽयं विवक्षितवन्तः। गुरोः मौनेन शिष्यस्य चित्ते यः परिवर्तनभावः प्रस्फुटति, स एव उपनिषदि शिक्षणस्य परमोद्देशः।**

**उपनिषदः शिक्षणे नैतिकमूल्यानां महत्त्वं सुस्पष्टतया प्रतिपादयन्ति। सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः[2] - एतानि तत्त्वानि शिक्षणस्य केन्द्रस्थायिनः स्तम्भा इव। आधुनिकशिक्षणव्यवस्थापि मूल्यशिक्षां, भावनात्मकबुद्धिं, उत्तरदायित्वबुद्धिं च अनिवार्यतया स्वीकरोति। character education इति यदद्य अत्यन्तप्रचलितम्, तस्य दार्शनिकभूमिर्नूनम् उपनिषददर्शने उपलभ्यते।**

---

[1] **तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, २.९.१**

[2] **तैत्तिरीयोपनिषद् १.११.१ (शिक्षावल्ली)**

**उपनिषदः शिक्षणप्रक्रिया तर्कशक्तिं, विश्लेषणदृष्टिं, आलोचकशक्तिं च विकसितुं समर्थाः । केनोपनिषत् मनसः बुद्धेः परिमितिः दर्शयन्ति, तत्त्वमस्य त्वं इति महावाक्येन अद्वैततत्त्वं व्यञ्जयन्ति, विद्यार्थीणां चिन्तनगतविस्तारं जागरयति। आधुनिकशिक्षणदर्शने Bloom's Taxonomy इत्यत्र उच्चस्तरचिन्तनं (analysis, evaluation, creation) अत्यन्तं महत्वपूर्णं; उपनिषदः अस्य सम्यगादर्शरूपं बहु सूक्ष्मतया प्रदर्शयन्ति।**

**उपनिषद्दर्शने शिक्षणं मनुष्यस्य अन्तर्लीनशक्तीनां प्रस्फुटनप्रक्रिया इति प्रतिपादितम्। मानवस्य आत्मा नित्यः, शुद्धः, बुद्धः, मुक्तः-इति उपनिषद्वाक्यानि दर्शयन्ति यत् शिक्षणं न किञ्चित् 'नवीनं' आरोपयति, अपि तु अन्तःस्थितं प्रकाशयति। आधुनिक-Humanistic education इत्यत्र Maslow तथा Carl Rogers इत्यादयः वैज्ञानिकाः यत् self-actualisation इति तत्त्वं प्रतिपादयन्ति, तस्य परिपूर्णदृष्टान्तः उपनिषदः सहस्राब्दिपूर्वमेव निष्पन्नवन्तः। अध्ययनम् अन्ते अस्य निष्कर्षः स्पष्टो भवति यत् उपनिषदः शिक्षणस्य समग्रतमं दर्शनम् उपदिशन्ति, यत्र ज्ञानं न केवलं शब्दराशिः, न ग्रन्थसङ्कलनम्, न परीक्षाफलम्, किन्तु मानवस्य चैतन्यस्य विकासः, अन्तरात्मनः प्रकाशः, विवेकबुद्धेः सुदृढीकरणं, धर्मनिष्ठाचिन्तनम्, तथा आत्मबोधस्य प्रकरणम्। आधुनिकशिक्षणव्यवस्था यदि एतानि तत्त्वानि सम्यगन्वितानि करोति तर्हि भविष्ये शिक्षणं अधिकमानवीयं, नैतिकसमन्वितम्, बौद्धिकरूपेण गाम्भीर्यमयम्, तथा आध्यात्मिकतया परिपक्वं भविष्यति इति दृढं प्रतिपन्नम्।**

**Keywords: उपनिषद्, शिक्षणपद्धतिः, संवादपरम्परा, आत्मविद्या, आधुनिकशिक्षणम्**

## विषयोपस्थापनम् ।

भारतीयदर्शनपरम्परायां यदा शिक्षणस्य स्वरूपं परीक्ष्यते तदा उपनिषदां स्थानं सर्वाधिकं गौरवयुक्तं भवति। उपनिषदः शिक्षणस्य तादृशं रूपं निर्दिशन्ति यत् न केवलं विद्यार्थीणां बौद्धिकक्षेत्रं व्याप्नोति, अपि तु तेषां अन्तर्मनसि सुप्तां जिज्ञासां जागरयति, व्यक्तित्वस्य समग्रसामर्थ्यं विकसितुं प्रेरयति, तथा मानवजीवनस्य परमार्थं द्योतयति। उपनिषदां शिक्षणदृष्टिः 'आत्मविद्यायाः अनिवार्यता' इति मूलतत्त्वे प्रतिष्ठिता। उपनिषदः मन्यन्ते यत् यदि मनुष्यः बाह्यार्थज्ञानं केवलं सञ्चिनोति, किन्तु आत्मस्वरूपज्ञानं नार्जयति, तर्हि सा विद्या अपूर्णा भवति। अत एव 'आत्मा वा अरे द्रष्टव्यः'[१] इति ब्रह्मवाक्यं शिक्षणस्य केन्द्रबिन्दुरूपेण प्रतिष्ठाप्यते।

## १. <u>संवादपद्धत्याधारिता शिक्षणप्रक्रिया</u> ।

उपनिषत्सु शिक्षणप्रक्रिया संवादपद्धत्याधारितं स्वाभाविक-शिक्षणव्यूहम् अनुसरति। उपनिषदः विद्यां गुरुवाक्येन न समापयति, नापि शिष्यं मौनग्रहणे बाधते; अपि तु प्रश्नोत्तर-संवादेन ज्ञानम् उद्घाट्यते। यत्र ज्ञानस्य प्रवाहः अन्वेषणात् प्रस्फुटति। अनेन उपनिषदः स्पष्टं सूचयन्ति यत् शिक्षणस्य मूलम् जिज्ञासा इत्येव।

एतस्मिन्नर्थे बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य गार्ग्याः सह संवादः विशेषतः द्योतकम्। गार्गी द्वौ प्रश्नौ करोति-ब्रह्मणः अनन्तरूपत्वं कथं ज्ञायते? कस्मिन् उ खलु अयम् आकाशो निहितः?[२] इत्यादि। तदा याज्ञवल्क्यः न ताम् निरस्तुं प्रयत्नं करोति, नापि आदेशेन तत्त्वं स्थापितुम् इच्छति; अपि तु प्रश्नस्य गर्भितार्थम् अवगन्तुं तां प्रेरयति-"मा मै ततोऽन्यथा अवोचः, न अतिव्याहारः भवेत्।"[३] एतदुक्त्या याज्ञवल्क्यः सूचयति यत् प्रश्नस्य सौष्ठवम्, तत्त्वनिष्ठानुभवेनैव उत्तरम् अवगन्तुं शक्यम्। अयं संवादः उपनिषदां शिक्षणपद्धतेः सर्वाधिकं उन्नतदृष्टान्तः - यत्र प्रश्न एव शिक्षणस्य मूलाधारः।

तथा नचिकेतसः यमेन सह संवादः Inquiry-based Learning इत्यस्य प्राचीनतमं स्वरूपं प्रकाशयति।

[१] बृहदारण्यकोपनिषद् २.४.५

[२] बृहदारण्यकोपनिषद् ३.६.८

[३] बृहदारण्यकोपनिषद् ३.६.१

 ISSN: 2349-6002

नचिकेताः यमं प्रति बहून् गूढप्रश्नान् पृच्छति- “एतद्विदित्वा मुनयोऽनुश्रान्ताः, नान्यः पन्था विद्यतेऽयनाय।”[१] नचिकेतः न केवलं मृत्युर्विषये जिज्ञासते, अपि तु आत्मनः नित्यत्वं, ब्रह्मणः स्वरूपम्, मोक्षमार्गस्य यथार्थं च अन्वेष्टुम् इच्छति। यमः अपि तं न आदेशेन शिक्षयति; प्रथमदिने तं परिक्षामिव प्रयुङ्क्ते- “अन्यच्छ्रेयोऽन्यदुतैव प्रेयः…”[२] तावुभौ विकल्पौ दत्वा पृच्छति-त्वं किम् इच्छसि? एतदाञ्जलिः शिष्यस्य तत्त्वनिर्णये स्वयमेव प्रवर्तते। अत्र शिष्यः प्रश्नम् आरभते, किन्तु उत्तरं स्वचिन्तनस्य परिपाके एव प्राप्तुम् शक्नोति। Inquiry-based pedagogy इति आधुनिकशिक्षणतत्त्वं उपनिषदेषु सर्वतोभद्रं स्वाभाविकरूपेण दृश्यते।

उद्दालक-श्वेतकेतुसंवादः अपि अस्यै शिक्षणपरम्परायै भव्यं प्रमाणं अस्ति। यत्र उद्दालकः श्वेतकेतुं बारं बारं पृच्छति- “किं मन्यसे? किम् पश्यसि?”[३] इत्यनेन सः शिष्यं स्वयम् तत्त्वबोधनाय प्रवर्तयति। श्वेतकेतुः यद्यपि विद्यान्वितः आसीत्, तथापि आचार्यः तं प्रश्नैः एव गाढतत्त्वस्य अन्तर्लयनं करवयति। तस्मादेव “तत्त्वमसि”[४] इति महावाक्यं अन्तिमं निष्कर्षरूपेण उद्भवति। अत्र अपि आदेशः न, परीक्षणम् न, किन्तु प्रश्न-संवाद-अन्वेषण-अनुभव-तत्त्वबोधन इति सम्पूर्णः शिक्षणप्रवाहः स्वयमेव विकसितः।

उपनिषदां विशेषता एषा यत् शिष्यस्य प्रश्न एव शिक्षणस्य प्रथमोपक्रमः। उपनिषदः वदन्ति-ज्ञानं न आदिष्टं भवति, न कथञ्चन आरोपितम्; अपि तु उद्घाट्यते। प्रश्नस्य सौष्ठवम्, अन्वेषणस्य प्रगल्भता, जिज्ञासायाः निष्ठा-एतान्येव तत्त्वानि उत्तरगुणं निश्चितयन्ति। तस्मात् शिष्यः यदि उत्तमप्रश्नं करोति, तस्य उत्तरम् अपि तत्त्वगर्भं भवति। अयं सिद्धान्तः आधुनिकशिक्षाशास्त्रे ‘Inquiry-based learning’ इति नाम्ना प्रख्यातः, किन्तु उपनिषद्-दर्शने सः अनादिकालात् उपस्थितः।

अतः स्पष्टं दृश्यते यत् आधुनिक-शिक्षणदर्शने यत् “प्रश्नाधारित-शिक्षणम्”, “जिज्ञासा-केन्द्रित-शिक्षणम्”, “संवादात्मक-अन्वेषणम्” इत्यादीनि तत्त्वानि नूतनरूपेण प्रतिपादितानि स्युः, तथापि तेषां आदिमरूपं उपनिषदां संवादपद्धतिषु निखिलेन सन्निहितम्। उपनिषदः शिक्षयन्ति यत् ज्ञानस्य मूलम् प्रश्नः, तस्य साधनम् संवादः, तस्य फलम् स्वानुभूतिः च। आधुनिक-पेडागोजी अस्मिन् बिन्दौ केवलं उपनिषदां शिक्षणपरम्परायाः पुनर्जागरणमात्रं करोति।

२. <u>दृष्टान्तोपदेशः शिक्षणपद्धतिः</u> ।

तदनन्तरमुपनिषदां शिक्षणपद्धत्यां दृष्टान्तोपदेशः अत्यन्तं केन्द्रीयं साधनं दृश्यते। दृष्टान्तः न केवलं साधारणमुदाहरणम्, नापि शब्दालङ्कारमात्रं, किं तर्हि, शिष्यस्य अनुभवमयी चेतनां स्पृष्ट्वा ब्रह्मतत्त्वस्य गूढार्थम् अवगाहयितुं विशेषः बौद्धिकोपक्रमः। सूक्ष्मब्रह्मतत्त्वं यत् दुष्प्रतिपाद्यम्, तदेव उपनिषदः प्राक्तनानुभवाधारितैः रूपकैः सुलभतया प्रकटयन्ति। अनेन दृष्टान्तः उपनिषदां शिक्षणप्रक्रियायाम् अनुभवाधारितज्ञानस्य प्रवेशद्वारम् इव भवति।

छान्दोग्योपनिषदि वटबीजदृष्टान्त अत्यन्तं प्रसिद्धम् । “एतत् न्यग्रोधबीजं भिन्धि… किम् पश्यसि? - न किञ्चन। यतो वै एतस्मात् सूक्ष्मात् बीजाद् एष न्यग्रोधो जायते।”[५] इति उद्धालक-श्वेतकेतुसंवादः । श्वेतकेतुः ‘न किञ्चन’ इति वदति। तदा आचार्यः ब्रह्मणः सूक्ष्मत्वं, सर्वकारणभूतत्वं च प्रतिपादयति। स्थूल-सूक्ष्मभावस्य अनुभवपरकः साक्षात्कारः अत्र साध्यते। बीज-वृक्षयोः पूर्वानुभूतं सम्बन्धम् आधृत्य अदृश्यं ब्रह्मस्वरूपं

[१] कठोपनिषद् १.३.१४

[२] कठोपनिषद्. १.२.१

[३] छान्दोग्योपनिषद् ६.१२ (उद्धालक–श्वेतकेतु संवादः)

[४] छान्दोग्योपनिषद् ६.८-१६

[५] छान्दोग्योपनिषद् ६.१२.१-३

सहजतया बोध्यते। एष उपक्रम अद्यतनीया 'Concrete Experience' इति शिक्षणपद्धतेः अत्यन्तं समीपवर्ती रूपः। एवमेव छान्दोग्योपनिषदि एव नदी-समुद्रदृष्टान्त अद्वैततत्त्वस्य अलौकिकं रहस्यं सुलभतया प्रकाशयति। "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय, एवं विद्वान् ब्रह्मणि लीयते।"।[१] नद्यः नामरूपाणि विहाय समुद्रं यथा प्राप्य एकत्वं यान्ति, एवमेव जीवः ब्रह्मणि लीयमानः अद्वैतैकतां प्राप्नोति। नदी, जलं, समुद्र इति विषयाः शिष्यस्य दैनिकानुभूमिषु अन्तर्भवन्ति, अतः अनभिज्ञस्यापि अद्वैतस्य तत्त्वं दृश्योपमानसन्निकर्षेण स्पष्टतया मनसि निबध्यते। अत्र अनुभवस्य आधारः, अनन्तरं मननात्मकप्रतिबिम्बनम्, इत्येतौ आधुनिक-शिक्षणस्य मुख्यतत्त्वौ स्वयमेव प्रकटेते।

३. <u>संवादशिक्षणपद्धतिः</u> ।

उपनिषदां संवादपद्धतिः अपि अस्याः अनुभवपरम्परायाः प्रमुखः अङ्गः। उद्धालकः, याज्ञवल्क्यः, यमः-एते गुरवः शिष्याणां चिन्तनशक्तिं उद्दीपयितुं प्रश्नान् पुनःपुनः पृच्छन्ति-"किं पश्यसि? किं मन्यसे?"-इत्यादि। अनेन शिष्यः केवलं श्रवणेन न तुष्टः, अपि तु अनुभूतस्य अन्तरालं विविच्य विचारयति। इयं प्रतिबिम्बचेष्टा आधुनिक-शिक्षणस्य 'Reflective Observation' इति चरणं यथावत् अनुकुरुते। अनुभव-चिन्तन-दृष्टान्त-विवेचनस्य अनन्तरं उपनिषदः ब्रह्मतत्त्वं प्रकाशितुं प्रवर्तते। 'सदेव सोम्य इदमग्र आसीत्'[२] , 'तत्त्वमसि'[३] , 'प्राण एव अस्य नाभिः'[४] इत्यादीनि महावाक्यानि अनुभवजनित-जिज्ञासायाः परीपाकरूपेण उद्भवन्ति। अत्र अनुभवः आधारः, सिद्धान्तः परिणामः-एवं शैक्षिकचक्रस्य पूर्णता दृश्यते।

उपनिषदः तत्त्वस्य केवलं बौद्धिकस्वीकारं नाभीष्टवन्, अपि तु व्यवहारिकानुभवपर्यन्तं साधनम्। तस्मात् बृहदारण्यकोपनिषद् वदति-"आत्मा वा अरे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः।"[५] 'निदिध्यासनम्' इति शब्दः तत्त्वस्य सक्रियजीवन-प्रयोगं द्योतयति, यः आधुनिक- 'Active Experimentation' इति शिक्षणचरणस्य साक्षादेव पूर्वरूपम्। उपनिषद्-शिक्षणस्य सारः-ज्ञानस्य जीवनपर्यन्तं प्रयोगः-अद्यतन-पेडागोजीमध्ये अत्यन्तं प्रतिष्ठितः।

अतः स्पष्टरूपेण दृश्यते यत् आधुनिक-'experiential learning' इति तत्त्वं यद्यपि वैज्ञानिकनावनूतनतया प्रचलति, तथापि तस्य मूलबीजानि उपनिषत्सु प्राचीनकालादेव निहितानि। अनुभव-प्रतिबिम्बन-तत्त्वबोधन-प्रयोग इति मानवशिक्षणस्य सार्वकालिकक्रमः उपनिषदाः स्पष्टतया आविष्कुर्वन्ति। आधुनिकशिक्षणदर्शनं नूतनशब्दप्रणालीमात्रं दर्शयति; तत्त्वतः तु उपनिषदां शिक्षणसम्प्रदायस्यैव पुनर्निनादः भवति।

4. <u>नानाविधआधुनिकशैक्षिकपद्धत्याः मूलं उपनिषदः</u> ।

उपनिषदः पुनः पुनः वदन्ति यत् मनुष्यस्य अन्तःकरणे एव 'ज्ञानेच्छा' इति शक्तिः स्थिताऽस्ति। "तमेव विदित्वा अति मृत्युमेति"[६] इति वाक्येन स्पष्टं भवति यत् ज्ञानं न बाह्याभ्यासफलम्, किन्तु आत्मानुभवस्य परिष्कृतिपर्यन्तं नीतं स्वाध्यायफलम्। आधुनिकशिक्षणमनोविज्ञानस्य दृष्ट्या यदि परीक्षामात्राः ज्ञानस्य मानदण्डः भवन्ति, तर्हि विद्यार्थिनः केवलं स्मरणशक्तिं प्रबलयन्ति, न तु ज्ञानस्य सारभूततत्त्वम्। उपनिषद्-शिक्षणमत्र विरुद्धदिशायां प्रवर्तते। तत्र विद्यार्थी जिज्ञासया

[१] छान्दोग्योपनिषद् ६.१०.१-३

[२] छान्दोग्योपनिषद् ६.२.१

[३] छान्दोग्योपनिषद् ६.८-१६

[४] प्रश्नोपनिषद् ३.६

[५] बृहदारण्यकोपनिषद् २.४.५

[६] श्वेताश्वतरोपनिषद् ३. ८

स्वशक्तिम् उद्घाटयते, न तु परीक्षाभयेन प्रवर्तते। अतः अद्य उपनिषदः यदा "competency-based education" इति दिशि प्रपञ्चः गच्छति, तदर्थं उत्कृष्टं मानकं प्रदर्शयन्ति।

शिक्षणस्य भावमूलत्वं दृष्टव्यं चेत् उपनिषदः मानवस्य अन्तःकरणस्य एकत्वदर्शनम् उद्घाटयन्ति। आधुनिकशिक्षणदर्शने बहुधा "social-emotional learning" इति नूतनशब्दाः प्रयुज्यन्ते। किन्तु उपनिषदः मन्यन्ते यत् मनसः संस्काराः, आत्मगौरवबुद्धिः, समत्वदृष्टिः, करुणा, धैर्यम्, सत्यनिष्ठा-एतानि मूल्यानि शिक्षणस्य अनिवार्याङ्गानि । न केवलं तत्त्वचिन्तनम्, किं तु चरित्र-निर्माणमपि शिक्षणस्य फलम्। आधुनिकराज्यनीतिषु character-building इत्यस्य प्रचारः तु नूतनः; परन्तु तस्य दार्शनिकाधारः उपनिषदां पुरातनपंक्तिषु स्पष्टं लभ्यते।

उपनिषदां शिक्षणदर्शनं मनुष्यस्य स्वातन्त्र्यं महदादरेण स्वीकरोति। नचिकेताः यदा यमेन प्रश्नं पृच्छति तदा यमः न तं निरुद्ध्य उत्तरं दत्तवान्; अपि तु तस्य योग्यता, धैर्यं, धृतिः परीक्ष्य ततः उत्तरं दत्तवान्। अस्मात् ज्ञायते यत् उपनिषत्सु शिक्षकः शिष्यं ज्ञानं प्रति धावितुं न बाधते; अपि तु तस्य स्वतन्त्रवेगं पोषयति। आधुनिक-शिक्षणशास्त्रे autonomy-supportive teaching इति पद्धतिः प्रसिद्धा, यत्र शिक्षकः विद्यार्थिनः स्वनिर्णयक्षमता, स्वाध्ययनयोग्यता च प्रोत्साहयति। उपनिषदः अस्य आदर्शं प्रदर्शयन्ति।

ज्ञानस्य स्वरूपे उपनिषदः एकं महद् आविष्कारं कुर्वन्ति-ज्ञानं मूलतः आन्तरिकप्रकाशः। आधुनिक cognitive-science इत्यत्र अध्ययने यत् 'metacognition' इति तत्त्वं-विद्यार्थी स्वचिन्तनं पश्यति, स्वशक्तिं व्यवस्थितयति, स्वाभ्यासं नियच्छति-एव उपनिषदां 'मनन'-पद्धत्यां प्रतिपादितम्। श्रवणं मननं निदिध्यासनम् इत्येतत् त्रितपः उपनिषदां शिक्षणस्य अनिवार्यं क्रमम्। अद्य psychologists वदन्ति यत् repeated exposure → reflective engagement → constructive internalisation इति यः शिक्षणक्रमः, तस्य पूर्णरूपं उपनिषदः सहस्रवर्षपूर्वं निर्दिष्टवन्तः।

अद्यतन-शैक्षिकदर्शने "critical thinking" अत्यन्तं आवश्यकतया मन्यन्ते। उपनिषदः तु तर्कशक्तेः अपारम् महत्त्वं दत्तवन्तः। केनोपनिषत् यदा वदति-'अनेन मनसा मनो न ज्ञायते'[१] -तदा तत्र सामान्यविवेकस्य सीमा दर्श्यते। उपनिषदः तर्कस्य परिमाणं ज्ञातुं विद्यार्थी प्रेर्यते। अस्याऽर्थे उपनिषद्-शिक्षणम् विद्यार्थिनः आलोचनात्मकदृष्टिं, विश्लेषणशक्तिं, प्रश्नपूर्तिक्षमतां च विकसितुं समर्थम्। आधुनिक-Bloom's Taxonomy यत्र उच्चस्तर-चिन्तनम् मूल्यवान्, तस्य दार्शनिकपूर्वरूपं उपनिष्यति।

अन्ततः उपनिषदां शिक्षणदर्शने एकं सर्वोच्चं तत्त्वं अस्ति-ज्ञानं तु केवलं उपादेयवस्तु न, अपि तु अस्तित्वस्य प्रकाशः। आधुनिकशिक्षणव्यवस्था व्यवसायप्रधानतां, स्पर्धामुखतां, यान्त्रिकअध्ययनं च प्रायः अतिक्रियते। उपनिषदः चेत् स्मारयन्ति यत् यदा शिक्षणं मनुष्यस्य अन्तःशक्तिं स्पृशति, तदा समाजः सुदृढः, शान्तः, मूल्यसम्पन्नः, आध्यात्मिकदृष्ट्या परिपक्वः च भवति। आधुनिक-विकासनीतिषु 'education for sustainable future' इति यत् ध्येयम्, तस्य आध्यात्मिक-सांस्कृतिक-नैतिकाधारः उपनिषदः पूर्णतया पूरयन्ति।

इत्थं विस्तीर्णपरिशीलनेन स्पष्टं भवति यत् उपनिषत्सु प्रतिपादिता शिक्षणपरम्परा न केवलं आधुनिक-शैक्षिकविचारस्य आधाररूपेण वेदनीया, अपि तु

[१] केनोपनिषत् - १. ६

 ISSN: 2349-6002

भविष्योन्मुखं वैश्विक-शिक्षणमूल्यम् अपि वहति। सामयिक-वैज्ञानिकतत्त्वैः सह तस्य समन्वयः न केवलं शक्यः, अपि तु आवश्यकः, यदि मानवजातिः ज्ञानस्य, करुणायाः, समत्वस्य, तथा आध्यात्मिकपरिणतिपर्यन्तस्य शिक्षणमार्गं पुनः प्राप्तुम् इच्छति तर्हि उपनिषदः शिक्षणक्षेत्रे शाश्वतपथप्रदर्शकाः भवेदिति निश्चप्रचम्।

## संदर्भग्रन्थ सूची


१. बृहदारण्यकोपनिषद्

२. तैत्तिरियोपनिषद्

३. केनोपनिषद्

४. छान्दोग्योपनिषद्

५. श्वेताश्वेतरोपनिषद्

६. प्रश्नोपनिषद्

७. कठोपनिषद्